7.1.11 SUPPORTING DOC

# वीरतादिवसः वृक्षाणामाकारप्रदानञ्च
(२३/०३/२०२१,३०/०३/२०२१)



शिवस्य प्रतिमायाः स्वच्छतां कुर्वाणाः छात्राः



विवेकानन्दप्रतिमायाः स्वच्छतां कुर्वाणाः छात्राः

## वीरतादिवसमुपलक्ष्य स्वच्छताकार्यक्रमः

मार्चमासस्य २३ तमे दिनाङ्के वीरतादिवसः (शहीददिवसः) आचर्यते। एतं दिवसमुपलक्ष्य श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य राष्ट्रिय-सेवा-योजनायाः संयोजकः डॉ. जयेशकुमारः मुंगरा छात्रैः सह वेरावलनगरस्य महानुभावानां प्रतिमानां स्वच्छतायाः आयोजनं कृतवान्। छात्राः राष्ट्रधर्मस्य पालनं कुर्वाणाः स्वामिविवेकानन्दस्य भगतसिंहस्य अम्बेडकरमहोदयस्य शिवस्य च प्रतिमानां स्वच्छतां कृतवन्तः। अस्य कार्यक्रमस्य आयोजनं संयोजनं च डॉ. जयेशकुमारः मुंगरा अकरोत्।

## वृक्षाणाम् आकारप्रदानम्

राष्ट्रिय-सेवा-योजनायाः संयोजकः डॉ. जयेशकुमारः मुंगरा उद्यानपालकेन सह ३०/०३/२०२१ तमे दिनाङ्के विश्वविद्यालयस्य परिसरे वर्तमानानां वृक्षामाम् आकारप्रदानस्य कार्यम् अकरोत्। वृक्षाणां योग्यम् आकारं कृत्वा जलार्थम् मृत्तिकया आलवालनिर्माणमपि अक्रियत।



वृक्षाणाम् आकारप्रदानम् कुर्वन् डॉ. जयेशः मुंगरा उद्यानपालकः च



वृक्षेभ्यः सुन्दराकारप्रदानम्

# पराक्रमदिवसः
# तथा
# राष्ट्रियमतदातृदिवसमुपलक्ष्य विशिष्टव्याख्यानञ्च
(२३/०१/२०२१)







व्याख्याने मुख्यः वक्ता डॉ. पङ्कजकुमारः रावलः, आयोजकः डॉ. जयेशः मुंगरा च

## पराक्रमदिवसस्य वृत्तम्

२३.१.२०२१ तमे दिनाङ्के शनिवासरे श्रीसोमनाथसंस्कृतविश्वविद्यालये पराक्रमदिवसस्यायोजनं जातम्। भारतसर्वकारस्य निर्देशालोके श्रीसुभाषचन्द्र-बोझमहोदयानां १२५ तमा जन्मजयन्ती समनुष्ठिता। कार्यक्रमऽस्मिन् वेबेक्समाध्यमेन राष्ट्रिय-सेवा-योजनाद्वारा एकस्य व्याख्यानस्यायोजनं जातम्। अत्र मुख्यवक्तृरूपेण डो. पङ्कजकुमार एस्. रावलः श्रीसुभाषचन्द्र-बोसमहोदयानां पराक्रमगाथां पराक्रमस्य महिमानं च वर्णितवान्। "भवन्तो मह्यं रक्तं यच्छन्त्वहं वः स्वातन्त्र्यं प्रदास्ये" इति तेषां मन्त्रवाक्येन ते महानुभावाः अस्माभिः स्मृताः। अत्र नैके छात्राः संलग्नाः सञ्जाताः। कार्यक्रमस्योपसंहारे डो. जयेशकुमार मुंगरा महोदयः श्रीसुभाषचन्द्र-बोसमहोदयानां जीवनविषये विशेषतया निवेदितवान्। मान्यानां कुलपतिवर्याणा प्रो. गोपबन्धुमिश्रवर्य्याणां, मान्यानां कुलसचिववर्याणां डॉ. दशरथ जादव वर्य्याणां, प्राचार्यचरणानां डॉ. नरेन्द्रकुमार पण्ड्या वर्य्याणां तथा च अनुस्नातकभवनाध्यक्षाणां डॉ. ललितकुमार पटेल महोदयानां स्मरणेन आभारविधिना पूर्णतामन्त्रेण च कार्यक्रमोऽयं पूर्णतां सम्प्राप्तः।



पराक्रमदिवसस्य व्याख्याने उपस्थिताः छात्राः

## राष्ट्रिय-मतदातृदिवसमुपलक्ष्य आयोजितं विशिष्टं व्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन राष्ट्रियमतदातृदिवसमुपलक्ष्य प्रतिज्ञाकार्यक्रमः तथा विशिष्टं व्याख्यानम् आयोज्यत। अस्मिन् कार्यक्रमे मध्याह्ने डॉ. जयेशकुमारः मुंगरा सर्वेभ्यः अध्यापकेभ्यः छात्रेभ्यः च प्रतिज्ञाम् अग्राहयत्। सायंकाले "मतदातृदिवसः मूलभूताधिकाराः च" इति विशिष्टं व्याख्यानम् आयोजितम्। कार्यक्रमस्य आरम्भे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः स्वागतप्रवचनम् अकरोत्। अस्य व्याख्यानस्य मुख्यः वक्ता वरिष्ठः अधिवक्ता श्रीकिशोरभाई-कोटकमहोदयः आसीत्। तेन संविधानानुसारं मूलभूताधिकाराणां विषये महत्त्वपूर्णं व्याख्यानं प्रदत्तम्। तदनन्तरं कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः उद्बोधनम् अकरोत्। अन्ते डॉ. पङ्कजकुमारः रावलः धन्यवादज्ञापनम् अकरोत्। कार्यक्रमस्य संयोजकः सञ्चालकः च डॉ. मोकरीया महोदयः आसीत्। अस्य व्याख्यानस्य आयोजनम् ओनलाईन वेबेक्स माध्यमेन कृतम्। अत्र विश्वविद्यालयस्य कुलसचिवः, सर्वेऽपि अध्यापकाः छात्राः च उपस्थिताः आसन्। इदं व्याख्यानं फेसबूक माध्यमेन लाईव प्रसारणं जातम् आसीत्।




मतदातृदिवसमुपलक्ष्य आयोजिते विशिष्टव्याख्याने मुख्यः वक्ता श्रीकिशोरभाई कोटकः, माननीयः कुलपतिः अध्यापकाः च



मतदातृदिवसमुपलक्ष्य प्रतिज्ञाकार्यक्रमे अध्यापकाः छात्राः च



मतदातृदिवसमुपलक्ष्य प्रतिज्ञाकार्यक्रमे अध्यापकाः छात्राः च

सरदारपटेलमहोदयानां – जन्मजयन्ती
(३१/१०/२०२०)



## सरदारपटेलजयन्ती

३१/१०/२०२० तमे दिनाङ्के सरदार वल्लभभाई पटेल महोदयानां जन्मदिनमुपलक्ष्य राष्ट्रिय-एकता-दिनम् आचर्यते। श्रीसोमनाथसंस्कृत- विश्व विद्यालये अस्मिन् दिने विशिष्टव्याख्यानस्य आयोजनम् अभवत्। सर्वादौ माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः विश्वविद्यालयस्य सभाभवने स्थितायाः सरदारपटेलवर्याणां प्रतिमायाः पुष्पमालिकया अर्चनाम् अकरोत्। ततः अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः प्रास्ताविकं शाब्दिकं स्वागतं च कृतवान्। अस्मिन् अवसरे सरदार पटेल विश्वविद्यालयस्य इतिहासविभागस्य अध्यापकः डॉ. वसन्तकुमारः पटेलः सरदार वल्लभभाई पटेल वर्याणां विषये अतीव रोचकं ज्ञानप्रदं च व्याख्यानम् अकरोत्। अस्य कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः सरदारमहिमामण्डनसहितम् आध्यक्षीयम् अभाषत। अस्मिन् अवसरे डॉ. जयेशकुमारः मुंगरा महोदयः सर्वेभ्यः राष्ट्रिय-एकतायाः शपथग्रहणम् अकारयत्। अन्ते कुलसचिवः डॉ. दशरथ-जादवमहोदयः सर्वेषां धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य आयोजनम् ओनलाइन वेबेक्स माध्यमेन कृतमासीत्। तत्र सर्वेऽपि अध्यापकाः कर्मचारिणः छात्राः च सम्मिलिताः आसन्। अस्य प्रसारणं फेसबुक उपरि कृतमासीत्, तत्र ३७६ जनाः एनं कार्यक्रमं दृष्टवन्तः। अस्य कार्यक्रमस्य संयोजनम् अध्यापिका अपूर्वा अग्रवालः कृतवती।



वृतान्तस्रोतः – सोमज्योतिः विश्वविद्यालयवृतान्तपत्रिका – जुलाई तः दिसम्बरमासः – २०२० वर्षम्, पृष्ठक्रमाङ्कः - २२

## संविधनदिवसः तथा मतदानजागृतिकार्यक्रमस्यायोजनम्
## (२६/११/२०२०)



### भारतीय-संविधान-दिवसान्तर्गतम् ओनलाईन विशिष्टं व्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २६/११/२०२० दिनाङ्के भारतीय-संविधान-दिवसान्तर्गतम् "भारत के संविधान का परिचय" इति विषयमधिकृत्य ओनलाइन विशिष्टं व्याख्यानम् आयोजितम्। अस्य कार्यक्रमस्य आरम्भे अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार-पटेलः महानुभावानां परिचयं प्रदाय स्वागतं कृतवान्। अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण सरदार-पटेल-विश्वविद्यालयस्य सहायकाचार्यः डॉ. अर्पित पाटडीया महोदयः संविधानस्य परिचयात्मकं विशिष्टं व्याख्यानं प्रदत्तवान् तथा संविधानस्य सम्माननं कर्तुं प्रतिज्ञाग्रहणमपि कारितवान्। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धु-मिश्रः आध्यक्षीयम् उद्बोधनम् अकरोत्। सम्पूर्णस्यास्य कार्यक्रमस्य आयोजनं सञ्चालनं च शारीरिकशिक्षणस्य अध्यापकः डॉ. जयेशकुमार-मुङ्गरा अकरोत्। अयं कार्यक्रमः वेबेक्स माध्यमेन आयोजितः, तत्र सर्वेऽपि अध्यापकाः कर्मचारिणः च संयुक्ताः अभवन्। कार्यक्रमस्य प्रसारणं फेसबुक माध्यमेन अपि कृतं, तत्र ६९१ जनाः इमं कार्यक्रमम् अवलोकितवन्तः।






भारतीयसंविधानदिवसे आयोजिते व्याख्याने उपस्थिताः महानुभावाः

### मतदातृ-जागृति-कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः तथा समाहर्तृ-कार्यालयः, वेरावलम्, इत्यनयोः संयुक्तोपक्रमेण २६/११/२०२० तमे दिनाङ्के ओनलाइन मतदातृ-जागृति-कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, गीर-सोमनाथ-जनपदस्य समाहर्ता श्रीमान् अजय-प्रकाशः, जनपदनिर्वाचनविभागस्य अधिकारी श्रीमान् विनोदचन्द्रः प्रजापतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः कर्मचारिणः छात्राः च उपस्थिताः आसन्। यस्य छात्रस्य वयः १८ वर्षेभ्यः अधिकं जातमस्ति तस्य निर्वाचनपरिचयपत्राय मार्गदर्शनं कर्तुम् अयं कार्यक्रमः समायोजितः आसीत्। अस्मिन् सन्दर्भे श्रीमान् विनोदचन्द्रः प्रजापतिः ओनलाइन निर्वाचनपरिचयपत्राय किं कथं च करणीयमिति मार्गदर्शनम् अकरोत्। माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः लोकशासनं प्रति अस्माकं कर्तव्यम् किमस्ति तथा निर्वाचने मतदानं कृत्वा वयं कथं परिवर्तनम् आनेतुं शक्नुमः इति विषये उद्बोधनम् अकरोत्। समाहर्ता श्रीमान् अजय-प्रकाशः सर्वेभ्यः मताधिकारस्य उपयोगं कर्तुं मार्गदर्शनं कृतवान्। अस्य कार्यक्रमस्य सञ्चालनं डॉ. जयेशकुमार मुंगरा महोदयः अकरोत् तथा संयोजनं तकनीकिसाहाय्यं श्रीहरेश-खेर-महोदयः अकरोत्। अयं कार्यक्रमः वेबेक्समाध्यमेन समायोजितः आसीत् तथा तस्य प्रसारणं फेसबुक माध्यमेन कृतमासीत्।




माननीयः कुलपतिवर्यः तथा गीर-सोमनाथजनपदस्य समाहर्त्ता




मतदातृ-जागृति-कार्यक्रमे उपस्थिताः महानुभावाः

वृतान्तस्रोतः – सोमज्योतिः विश्वविद्यालयवृतान्तपत्रिका – जुलाई तः दिसम्बरमासः – २०२० वर्षम्, पृष्ठक्रमाङ्कः - २३


# संस्कृतसप्ताहोत्सवः

## (३१/०७/२०२० तः ०६/०७/२०२०)



### संस्कृतसप्ताहोत्सवः


प्रतिवर्षमिव अस्मिन् वर्षे अपि श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहमहोत्सवस्य आयोजनम् ३१ तः ०६/०७/२०२० तमेषु दिनाङ्केषु जातम्। अस्य सप्ताहोत्सवस्य उद्घाटनसत्रं ३१/०७/२०२० तमे दिनाङ्के शुक्रवासरे प्रातः सार्धदशवादने अभवत्। उद्घाटनसत्रे प्रास्ताविककथनं महानुभावानां स्वागतं च प्राचार्यः नरेन्द्रकुमारः पण्ड्यामहोदयः अकरोत्। ततश्च क्रमेण श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भाष्यपरम्परा ज्ञानप्रवाहश्च, २. काश्मीरशाक्तदर्शनम् एवञ्च भवानीसहस्रनामनिरूपणम् इति पुस्तकद्वयस्य लोकार्पणं महानुभावानां करकमलैः जातम्।




संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः



संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे पुस्तकविमोचनम्




संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रस्य Live प्रसारणम्

अस्मिन् उद्घाटनसत्रे मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः संस्कृत-संवर्धन-प्रतिष्ठानस्य न्यासी पद्मश्रीः चमूकृष्णशास्त्रिवर्यः। मान्यः शास्त्रिवर्यः संस्कृत-प्रसाराय व्रती वर्तते इति विज्ञातप्रायम्। तस्य भाषणमपि सर्वथा प्रासङ्गिकम् अनुकरणीयं च भवति इत्यपि प्रसिद्धमेव। इत्थमस्मिन् अवसरेऽपि श्रीमान् शास्त्रिवर्यः संस्कृतसेवायै नूतनान् उपायान् प्रदर्शितवान्। संस्कृतशिक्षकाः कथं संस्कृतं प्रसारयितुं शक्ताः इति विषयेऽपि विविधान् उपायान् सः अवदत्। आधुनिकः कालः तकनीकिकालः, यन्त्रकालः वर्तते, विविधानां यन्त्राणां तकनीकीनां च उपयोगेन संस्कृतकार्यं कथं भवितुं शक्नोति इति शास्त्रिमहोदयेन अवादि।

कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय संस्कृतसप्ताहस्य, वर्तमानसमये संस्कृतस्य च महत्त्वम् अवदत्। कार्यक्रमस्य अन्ते कुलसचिवः डॉ दशरथ जादवः सर्वेषां कृते धन्यवादनवचांसि प्रकटितवान्।

अस्य उद्घाटनकार्यक्रमस्य संचालनं साहित्यविभागस्य सहायकाचार्येण श्रीजिगरभट्टमहोदयेन अक्रियत। एतस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्नमहाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, छात्राः च ऑनलाइन वेबेक्स माध्यमेन भागं गृहीतवन्तः। एतस्य उद्घाटनकार्यक्रमस्य फेसबुक माध्यमेन लाइव प्रसारणमपि जातम्। तत्रापि प्रायः सप्तशतं जनाः अमुं कार्यक्रमं दृष्ट्वा लाभान्विताः समभवन्।

अस्मिन् सप्ताहोत्सवे विविधाः स्पर्धाः कार्यक्रमाः च आयोजिताः आसन्। स्पर्धानाम् आयोजनं विश्वविद्यालयस्य अध्यापकैः कृतमासीत्। संस्कृतप्रचाराभियानम् अपि अस्मिन् सप्ताहे आयोजितम्। प्रचाराभियानस्य अङ्गतया विडियो अभियानम् तथा सूक्ति-अभियानम् आचरितम्। रक्षाबन्धनस्य दिवसः संस्कृतदिवसः अस्ति अतः तस्मिन् दिने ३.८.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा विडिओ अभियानस्य अङ्गतया महानुभावैः, संस्कृतमहाविद्यालयप्राध्यापकैः, विश्वविद्यालयकर्मचारिभिः, पूर्वच्छात्रैः, संस्कृतानुरागिभिः च लघु-चलच्चित्राणि निर्मितानि आसन् तेषां सोशिअल मिडिया माध्यमेन प्रचारः कृतः। आहत्य १४० जनाः तादृशाणि चलच्चित्राणि प्रेषितवन्तः। तेषु गुजरातराज्यस्य माननीयः शिक्षणमन्त्री, स्वामि-श्रुतिप्रकाशदासः, प्रो. चेतन त्रिवेदी, प्रो. नितिन पेथाणी इत्यादयः महानुभावाः अपि आसन्। विश्वविद्यालयस्य प्रायः सर्वेऽपि कर्मचारिणः स्वस्य, स्वकुटुम्बस्य, स्वबान्धवानां च चलच्चित्राणि प्रेषितवन्तः। एतेषां चलच्चित्राणां सम्पादनं कृत्वा तत्र विश्वविद्यालयस्य लोगो समारोप्य एतानि तेभ्यः प्रत्यर्पितानि। सर्वैः अपि सामाजिकमाध्यमैः तानि प्रसारितानि। विश्वविद्यालयस्य फेस-बुक-पृष्ठ-द्वारा एतेषु उपषष्टिः चलच्चित्राणि प्रसारितानि। फेसबुकद्वारा अस्मद्विश्वविद्यालयद्वारा जायमानम् एतद् अभियानं वीक्ष्य अन्येऽपि नैके संस्कृतानुरागिणः प्रेरिताः। तैः अपि एतादृशाः यत्नाः अनुष्ठिताः। एतेन प्रकारेण अन्यूनं २५००० जनान् प्रति संस्कृत-दिनस्य सन्देशः गतः। विडिओ-अभियानस्य संयोजनम् डॉ.दीपेशः कतिरा अकरोत्।

प्रचाराभियानस्य अङ्गतया एव संस्कृतसूक्ति-अभियानम् अभवत्। सूक्त्यभियाने फेसबुक एवं ट्वीटरमाध्यमेन संस्कृतसाहित्यस्य प्रसिद्धसूक्तिषु प्रतिदिनम् १० सूक्तीनां प्रचारः जातः। सूक्ति-अभियानस्य संकलनं श्रीजिगरभट्टः अकरोत्।

# शिक्षकदिवसः गान्धीजयन्ती प्रचाराभियानञ्च
(०५/१०/२०२०, ०२/१०/२०२०)



## शिक्षकदिवसः


श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ०५.१०.२०२० तमे दिनाङ्के डॉ. सर्वपल्लि राधाकृष्णन् महोदयस्य जन्मदिवसं शिक्षकदिवसं च उपलक्ष्य निबन्धलेखनस्पर्धा आयोजिता। अस्यां स्पर्धायाम् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य, विविधमहाविद्यालयानां च ८ छात्राः भागमगृह्णन्। सर्वेषामपि निबन्धाः उत्तमाः आसन्। अस्यां स्पर्धायाम् एते छात्राः क्रमेण स्थानं प्राप्तवन्तः। तेषां नामानि यथा-

१. प्रकाशः जानी (प्रथमः), BAPS स्वामिनारायण-संस्कृत-महाविद्यालयः, सारङ्गपुरम्।
२. रविकुमारः रादडिया (द्वितीयः), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।
३. मृदुल (तृतीया),कालिकट् आदर्श संस्कृत विद्यापीठम्, केरला।

अस्यां स्पर्धायां निर्णायिकारूपेण कु. विदुषी बोल्ला आसीत् तथा स्पर्धायाः संयोजनम् डॉ. उमामहेश्वरी महोदया अकरोत्।

## गान्धीजयन्ती

०२/१०/२०२० तमे दिनाङ्के महात्मनः मोहनदास क. गान्धीवर्यस्य जन्मदिनमुपलक्ष्य श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ओनलाइन प्रश्नोत्तर्याः आयोजनं कृतमासीत्। अस्याः प्रश्नोत्तर्याः आयोजनम् अनुस्नातकविभागस्य अध्यक्षस्य डॉ. ललितकुमार पटेल महोदयस्य तथा महाविद्यालयस्य प्राचार्यस्य डॉ. नरेन्द्रकुमार पण्ड्या महोदयस्य मार्गदर्शनेन सहायकाचार्यः श्रीविपुलः जादवः महोदयः अकरोत्। एषा प्रश्नोत्तरी ३१/०९/२०२० तः ०२/१०/२०२० यावत् उद्घाटिता आसीत्, एतेषु दिवसेषु अस्याम् ओनलाइन प्रश्नोत्तर्याम् आहत्य ४८५ प्रतिभागिनः भागं गृहीतवन्तः। सर्वेभ्यः प्रतिभागिभ्यः ई-प्रमाणपत्रम् अपि प्रदत्तम्।




अस्यैव अङ्गतया ०१/१०/२०२० तमे दिनाङ्के सायं ०५ वादने विश्वविद्यालयस्य परिसरे माननीयस्य कुलपतिवर्यस्य प्रो. गोपबन्धुमिश्रमहोदयस्य मार्गदर्शनेन सर्वैः अध्यापकैः कर्मचारिभिश्च वृक्षारोपणम् अक्रियत। अस्य संयोजनं व्यवस्थापनं च डॉ. जयेशः मुंगरा महोदयः अकरोत्।

## प्रचाराभियानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः नूतनसत्रस्य आरम्भे विश्वविद्यालयस्य प्रचारं प्रसारं कर्तुं विविधशालासु संस्थासु च गतवन्तः। विश्वविद्यालये शास्त्रि-आचार्ययोः कक्ष्ययोः ते छात्राः कथं प्रवेशं प्राप्तुं शक्नुवन्ति? विश्वविद्यालये प्रवेशं प्राप्य तेषां किं भविष्यत् वर्तते? इत्यादिविषये तेषां मार्गदर्शनम् अध्यापकैः कृतम्। अस्मिन् प्रचाराभियाने विश्वविद्यालयस्य प्रचार-प्रसारसमितिः जूनागढ-मेंदरडा-कोडिनार-केशोद-माळिया आदिषु नगरेषु विविधाः शालाः महाविद्यालयान् च गत्वा तत्रत्यान् छात्रान् उदबोधयत्। डॉ. दीपेशः कतिरा, डॉ. आशा माढकः, श्रीविपुलः जादवः, कु.अपूर्वा अग्रवालः एते मिलित्वा कोडिनार-क्षेत्रे महाविद्यालयेषु प्रचार-प्रसारम् अकुर्वन्। डॉ. जयेशः मुंगरा, श्रीजिगरः भट्टः, कु. अपूर्वा अग्रवालः, कु. दृष्टि बारैया चैते जूनागढ-क्षेत्रे प्रचार-प्रसारम् अकुर्वन्। एतैः तत्रत्यानां छात्राणां विश्वविद्यालये प्रवेशाय मार्गदर्शनम् अकारि। अनेन अस्मिन् सत्रे शास्त्रि-आचार्ययोः छात्राणां सङ्ख्याऽपि वर्धमाना अस्ति।




# विश्वयोगदिवसः

## विश्वयोगदिवसमुपलक्ष्य योगशिबिरम्




श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विश्वयोग-दिवसम् उपलक्ष्य सप्तदिनात्मकस्य ओनलाइन योगशिबिरस्य आयोजनम् अक्रियत। अस्य आरम्भः १४/०६/२०२१ तमे दिनाङ्के अभवत्। २०/०६/२०२१ तमं दिनाङ्कं यावत् प्रतिदिनं सायं ०५ वादनतः ०६ वादनं यावत् एतत् योगशिबिरम् अभवत्। शिबिरे अस्मिन् त्रीणि दिनानि डॉ. जयेशः मुंगरा तथा च चत्वारि दिनानि दृष्टिः बारैया मार्गदर्शनम् अकरोत्। अस्य शिबिरस्य संयोजकत्वेन अपि एतौ द्वौ कार्यम् अकुरुताम्। एतस्य शिबिरस्य सर्वाणि व्याख्यानानि विश्वविद्यालयस्य फेसबुक जालपुटे उपलब्धानि सन्ति।




## अन्ताराष्ट्रियः योगदिवसः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विश्वयोगदिवसम् उपलक्ष्य २१/०६/२०२१ तमे दिनाङ्के ओनलाइन कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे डॉ. जयेशः मुंगरा मङ्गलाचरणम् अकरोत्। ततः अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः उपस्थितानां स्वागतम् अकरोत्। कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः अस्मिन् अवसरे योगस्य महत्त्वं विज्ञाप्य सर्वेभ्यः योगदिनस्य शुभकामनाः प्रादात्। डॉ. जयेशः मुंगरा योगस्य नियमान् विज्ञाप्य योगाभ्यासम् अकारयत्। योगदिवसस्य अस्य कार्यक्रमस्य कृतज्ञताज्ञापनं माननीयः कुलसचिवः डॉ. दशरथः जादवः अकरोत्। कार्यक्रमे अस्मिन् विश्वविद्यालयस्य अध्यापकाः कर्मचारिणः च उपस्थिताः आसन्। सर्वैः स्वगृहे स्थित्वा योगासनानि प्राणायामश्च आचर्यन्त। कार्यक्रमस्य सञ्चालनं दृष्टिः बारैया अकरोत्। सम्पूर्णकार्यक्रमस्य संयोजकत्वेन डॉ. जयेशः मुंगरा तथा दृष्टिः बारैया कार्यम् अकुरुताम्।



# विश्वसिंहदिवसः , राष्ट्रियसेवायोजनादिवसः, स्वातन्त्र्यदिवसः च



## विश्वसिंहदिवसः

२०२० वर्षस्य अगस्तमासस्य १०मे दिनाङ्के श्रीसोमनाथ-संस्कृत-विश्वविद्यालये विश्वसिंहदिवसस्य आयोजनमभवत्। अस्य कार्यक्रमस्य आरम्भे महानुभावानां स्वागतं अनुस्नातकविभागाध्यक्षः डॉ.ललितपटेलमहोदयः कृतवान्। सिंहानां संरक्षणाय एकं व्याख्यानमभवत् तत्र प्रो. संजयभाई भूत महोदयेन तथा श्रीनवलभाई भावसार महोदयेन सिंहानां संरक्षणाय अनेके उपायाः सूचिताः। कार्यक्रमे माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रवर्यः अध्यक्षत्वेन उद्बोधनम् अकरोत्। कार्यक्रमस्य संयोजनं डॉ.रमेशचन्द्रः शुक्लः श्रीनित्यानन्द-ओझा च कृतवान्। उपस्थितानां धन्यवादज्ञापनं डॉ. शुक्लमहोदयः कृतवान् तथा सञ्चालनं श्रीनित्यानन्दः ओझा कृतवान्।



विश्वसिंहदिवसम् उपलक्ष्य आयोजितं व्याख्यानम्




विश्वसिंहदिवसे भाषमाणः श्रीनवलभाई भावसारः तथा श्रीसंजयभाई भूतः

## राष्ट्रियसेवायोजनादिवसः

२४/०९/२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृत विश्वविद्यालये राष्ट्रिय-सेवा-योजना-दिवसम् उपलक्ष्य वृक्षारोपणं तथा विशिष्टं व्याख्यानम् आयोजितम्। डॉ. जयेशकुमारः मुंगरा महोदयः छात्रान् उद्बोधितवान् तथा राष्ट्रसेवायै राष्ट्रियसेवायोजनायाः महत्त्वम् अपि सः उक्तवान्। अस्मिन् कार्यक्रमे विश्वविद्यालयसञ्चालित संस्कृत महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या महोदयः अध्यक्षत्वेन उपस्थाय मार्गदर्शनम् अकरोत्। विश्वविद्यालयपरिसरे अध्यापकैः वृक्षारोपणम् अपि कृतम्। कोरोनाकाले यत्र कुत्रापि वयं भवामः किन्तु वृक्षारोपणम् अवश्यम् एव करणीयं तथा वृक्षाणा पालनम् अस्माकं कर्तव्यम् अस्ति इति अस्मिन् कार्यक्रमे आयोजकैः सन्दिष्टम्। अन्ते धन्यवादज्ञापनेन पूर्णतामन्त्रेण च अयं कार्यक्रमः पूर्णः अभवत्।



## स्वातन्त्र्यदिवसः

प्रतिवर्षमिव अस्मिन् वर्षेऽपि श्रीसोमनाथसंस्कृतविश्वविद्यालये १५ अगस्त २०२० तमे दिनाङ्के भारतस्य ७४तमः स्वतन्त्रतादिवसः आचरितः। विश्वविद्यालयस्य मान्यः कुलपतिः प्रो.गोपबन्धुमिश्रः ध्वजोत्तोलनम् अकरोत्। ततश्च सर्वैः अध्यापकैः कर्मचारिभिश्च ध्वजवन्दम् अक्रियत। अस्मिन् वर्षे कोरोनासङ्क्रमणकारणेन सर्वे विश्वविद्यालयस्य अध्यापकाः कर्मचारिणश्च शारीरिकरूपेण अन्तरं परिपाल्य परिसरे ध्वजवन्दनाय उपस्थिताः आसन्। अस्मिन् प्रसङ्गे माननीयः कुलपतिवर्यः स्वकीये उद्बोधने अवदत् यत् सम्प्रति सम्पूर्णं विश्वं कोरोना सह युद्धं कुर्वत् वर्तते। सर्वत्र असामान्या स्थितिः अस्ति। सत्यपि कष्टे भारतम्, तेन सह अस्माकं विश्वविद्यालयोऽपि प्रगतिं कुर्यात् इति कुलपतिना अवादि। प्रतिवर्षं विविधकार्यक्रमाः भवन्ति एव किन्तु अस्मिन् वर्षे कोरोना कारणेन ध्वजवन्दनं विधाय कुलपतिवाचं च निशम्य कार्यक्रमः पूर्णः कृतः। अस्य कार्यक्रमस्य संयाजनं डॉ. जयेशकुमारः मुंगरा महोदयः अकरोत्।



# गणतन्त्रदिवसः



## गणतन्त्रदिवसः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षमिव अस्मिन् वर्षेऽपि राष्ट्रियः उत्सवः गणतन्त्रदिवसः सोत्साहम् आचरितः। माननीयः कुलपतिवर्यः प्रो. गोपबन्धुः मिश्रः ध्वजोत्तोलनम् अकरोत्, ततश्च सर्वैः अध्यापकैः कर्मचारिभिः छात्रैश्च ध्वजवन्दनं विहितम्। अस्मिन् प्रसङ्गे छात्रैः सांस्कृतिककार्यक्रमः अपि आयोजितः, यस्मिन् तैरेव देशभक्तिगीतं, नृत्यं, वंशीवादनं, देशभक्तिभाषणं च प्रस्तुतम्। अस्मिन् अवसरे साहित्यविभागस्य अध्यापकः श्रीजिगरभाई भट्टः स्वरचितस्य भारताष्टक-काव्यस्य प्रस्तुतिमपि अकरोत्। सांस्कृतिककार्यक्रमस्य सञ्चालनं श्रीजिगरभाई भट्टः अकरोत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः, सर्वेऽपि अध्यापकाः कर्मचारिणः छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य अन्ते सर्वेषां कृते अल्पाहारस्य व्यवस्था कृता आसीत्। समग्रकार्यक्रमस्य संयोजनं डॉ. जयेशकुमारः मुंगरा अकरोत्।



गणतन्त्रदिवसे ध्वजवन्दनकार्यक्रमः



गणतन्त्रदिवसे ध्वजवन्दनकार्यक्रमे माननीयः कुलपतिवर्यः, कुलसचिवः, अध्यापकाः कर्मचारिणः च

## महिलानामुन्नत्यै आयोजिताः कार्यक्रमाः
## (०८/०३/२०२१, २६/०४/२०२१)

### अन्ताराष्ट्रियमहिलादिवसमुपलक्ष्य आयोजितः कार्य्यक्रमः

महिलाधिकारसमित्या अन्ताराष्ट्रियमहिलादिवसमुपलक्ष्य छात्राणां कृते ०८/०३/२०२१ तमे दिनाङ्के सोमवासरे मध्याह्ने द्वादशवादनतः सार्धैकवादनपर्य्यन्तं 'बेटी बचाओं, बेटी पढाओं'/ 'आत्मविश्वासी महिला' इति विषये चित्रकलाप्रतियोगिता समायोजितासीत्। अस्यां प्रतियोगितायाम् एकादश छात्राः भागं गृहीतवत्यः। अनन्तरं सायङ्काले सार्धचतुर्वादनतः एकः कार्य्यक्रमः आयोजितः। अस्मिन् कार्य्यक्रमे मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथः जादवः, अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, वेदविभागस्य आचार्यः प्रो. देवेन्द्रनाथपाण्डेयः, महिलाधिकारसमितेः अध्यक्षा प्रो. अर्चनाकुमारीदुबे, अन्याः अपि सदस्याः, छात्राश्च सम्मिलिताः आसन्। कार्य्यक्रमेऽस्मिन्नुपस्थितानां परिचयपुरस्सरं स्वागतं दर्शनविभागस्य सहायिकाचार्या डॉ. उमामहेश्वरी अकरोत्। ततः परं महिलाधिकारसमितेः अध्यक्षायाः प्रो. अर्चनाकुमारी-दुबे-वर्यायाः व्याख्यानम् अभवत्। उद्बोधनानन्तरमाचार्य्यद्वितीयवर्षस्य छात्रा सुश्रीकरुणा चौधरी स्वभावनां प्रकटितवती। तत्पश्चात् चित्रकलाप्रतियोगितायाः विजेत्र्यः छात्राः अनुस्नातकविभागाध्यक्षैः, प्राचार्य्यैश्च पुरस्कृताः। पूर्णतामन्त्रेण कार्य्यक्रमोऽयं सम्पन्नः। अस्य कार्य्यक्रमस्य सञ्चालनं व्याकरणविभागस्य सहायिकाचार्य्या डॉ. विदुषीबोल्ला अकार्षीत्।

चित्रकलाप्रतियोगितायाः पुरस्कारभाजः सन्ति -

1. प्रथमस्थानम् - मुलचन्दाणी पूनम
2. द्वितीयस्थानम् -गामीत श्रद्धा
3. तृतीयस्थानम् -गामीत हेतलकुमारी



अन्ताराष्ट्रियमहिलादिवसे कार्यक्रमस्य दृश्यम्


विजेतृभ्यः पुरस्कारप्रदानम्



### 'महिला सशक्तीकरण हेतु सर्वकारीय योजनाएँ' इति व्याख्यानम्

महिलाधिकारसमित्या छात्राणामुपकाराय 26/04/2021 तमे दिनाङ्के सोमवासरे चतुर्वादनतः पञ्चवादनपर्य्यन्तं 'महिला सशक्तीकरण हेतु सर्वकारीय योजनाएँ' इति आधुनिकसमाजोपयोगिविषयमादाय एकं व्याख्यानं समायोजितम्, अस्य प्रसारणं फेसबुकमाध्यमेनाऽपि कृतम्। कार्य्यक्रमेऽस्मिन् मान्याः कुलपतिवर्य्याः प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्ष्यमूढवन्तः एवञ्च उद्बोधिकाः आसन् – डॉ॰ निशाबेनगोहिलमहोदयाः। तथा च कुलसचिवाः डॉ. दशरथजादवमहोदयाः, अनुस्नातकविभागाध्यक्षाः डॉ॰ ललितकुमारपटेलवर्य्याः, महाविद्यालयस्य प्राचार्य्याः पण्ड्यावर्य्याः, वेदविभागस्य आचार्य्याः प्रो. देवेन्द्रनाथपाण्डेयवर्य्याः, महिलाधिकारसमितेः अध्यक्षाः प्रो॰ अर्चनाकुमारीदुबेमहाभागाः, अन्याः अपि सदस्याः, विश्वविद्यालयस्य सर्वेऽपि आचार्य्याः, छात्राश्च संलग्नाः आसन्। कार्य्यक्रमस्यारम्भे वैदिकपरम्परानुगुणं मङ्गलं दर्शनविभागस्य सहायकाचार्यया डॉ. उमामहेश्वरीमहाभागयाचरितम्। कार्य्यक्रमेऽस्मिन्नुपस्थितानां परिचयपुरस्सरं स्वागतं अनुस्नातकविभागस्य अध्यक्षैः डॉ. ललितकुमारपटेलवर्य्यैः अकारि। ततः परं मुख्यवक्त्रीणां डॉ. निशाबेनगोहिलवर्य्याणामुद्बोधनं सञ्जातम्। महिलानां कृते सर्वकारस्य योजनानां विस्तरेण परिचयः, तत्स्वरूपञ्च सुष्ठु प्रचोदितम्। उद्बोधनानन्तरमध्यक्षीयवचोभिः कुलपतीनां मार्गदर्शनं लब्धम्। योजनानां विषये समये समये समाजे जागर्त्त्यभियानमपि सर्वकारेण कारयेत् इति उदीरितवन्तः। कार्य्यक्रमस्यान्ते धन्यतावचांसि ज्योतिषविभागस्य सहायिकाचार्या सुश्रीअपूर्वा अग्रवालमहोदयाविष्कृतवती। पूर्णतामन्त्रेण कार्य्यक्रमोऽयं सम्पन्नः। अस्य कार्य्यक्रमस्य सञ्चालनं योगविभागस्य प्राध्यापिका सुश्रीदृष्टिबेनबारैयावर्य्याकार्षीत्।

वृतान्तस्रोतः – सोमज्योतिः विश्वविद्यालयवृतान्तपत्रिका – जान्यआरी तः मार्चमासः तथा अप्रैल – जूनमासः २०२१ वर्षम्, पृष्ठक्रमाङ्कः – १७,०६

## फिट्-इण्डिया-प्रकल्पान्तर्गते समायोजितः कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये मार्चमासस्य अष्टमे दिनाङ्के फिट्-इण्डिया-प्रकल्पान्तर्गतः कश्चन कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे डॉ. जयेशकुमारः मुंगरा महिलानां कृते आत्मरक्षणाय विविधान् व्यायामान्, प्राणायामनियमान् तथा च योगासनानि शिक्षितवान्। महिलानां रोगाणां विषये अपि मुंगरा महोदयेन व्याख्यानं प्रदत्तं तथा च तेभ्यः रोगेभ्यः रक्षणार्थम् उपायाः अपि सूचिताः। अनेन कार्य्यक्रमेण छात्रेषु आत्मरक्षणाय भावना जागृता तथा च विभिन्नशारीरिकव्यायामेन कथं स्वास्थ्यं सम्पादनीयमिति विषयेऽपि जागरूकता सञ्जाता।



महिलानां रोगाणाम् उपचाराय मार्गदर्शनं कुर्वन् डॉ. जयेशः मुंगरा



व्यायामान् कुर्वन्त्यः बालिकाः

## कोरोनाकाले मुखावरणवितरणं सामाजिकान्तरपालनकार्यक्रमः च



मुखावरणं वितरन् डॉ. ललितकुमारः पटेलः



कीटनाशकं हस्तप्रक्षालनद्रव्यं प्रयच्छन् छात्रः

११-०१-२०२१तमे दिनाङ्के सर्वकारस्य सूचनानुसारं विद्यार्थिनः प्रत्यक्षशिक्षणाय प्रवेशं प्राप्तवन्तः। तत्र प्राप्तप्रवेशाय प्रत्येकं विद्यार्थिने मुखावरणम् (Mask) प्रदत्तम्। तेन सह सामाजिकान्तरस्य (Social distancing) पालनाय सूचनाः तथा सर्वकारस्य दिशानिर्देशानुसारं विविधाः सूचनाः अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः प्रादात्। अस्मिन्नेव कोरोनाकाले विश्वविद्यालये प्रचलन्त्याः परीक्षायाः निरीक्षणं मा. कुलपतिमहोदयैः कृतम्। एतस्मिन् कार्यक्रमे एन.एस.एस. प्रोग्राम को-ऑर्डिनेटर डॉ. जयेश डी. मुंगरामहोदयः अपि संलग्नः आसीत्।

## राष्ट्रिय-एकता-प्रतिमायाः (SOU) मार्गदर्शकेभ्यः प्रशिक्षणकार्यक्रमः

भारतसर्वकारेण वडोदरामहानगरस्य समीपे केवडीया-नामाख्ये स्थाने लोहपुरुषस्य सरदारवल्लभभाई-पटेल-महोदयस्य स्मृतौ राष्ट्रिय-एकता-प्रतिमायाः (स्टेच्यू ओफ युनिटी) स्थापना कृता वर्तते। अस्य स्थानस्य महत् वैशिष्ट्यम् अस्ति यत् अत्रत्याः मार्गदर्शकाः विविधाभिः भाषाभिः प्रवासिजनानां मार्गदर्शनं कुर्वन्ति। सरल-मानक-संस्कृतेन अपि प्रवासिनां मार्गदर्शनं स्यात् तदर्थं संस्कृतभारत्याः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः छात्राः च मार्गदर्शकानां प्रशिक्षणं कर्तुं तत्र गतवन्तः। एषः प्रशिक्षणकार्यक्रमः जनवरीमासस्य २२-२३ दिनाङ्कयोः आयोजितः। अस्मिन् प्रशिक्षण-कार्यक्रमे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, अतिथ्यध्यापकः श्रीमेहुलभाई जोषी, छात्रः रविः रादडिया च प्रशिक्षकत्वेन गत्वा कार्यं कृतवन्तः। दिनद्वये सरलमानकसंस्कृतेन प्रवासिनां मार्गदर्शनं कर्तुं राष्ट्रिय-एकता-प्रतिमायाः मार्गदर्शकाः सिद्धाः। सम्प्रति तत्र संस्कृत-मार्गदर्शकस्य व्यवस्था अस्ति। अयं प्रयत्नः भारतस्य माननीय-प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिमहोदयेन "मनसः वार्ता" कार्यक्रमे उल्लेखपूर्वकं श्लाघितः।





मार्गदर्शकानां मार्गदर्शनं कुर्वन्तौ रवि रादडिया मेहुल जोषी च

# रामायण एवं व्यक्तित्व विकास तथा रघुवंशम् इति अल्पकालीना प्रमाणपत्रीय-योजना




शोर्ट-टर्म-योजनाद्वयस्य उद्घाटनम्






श्रीसोमनाथसंस्कृतविश्वविद्यालयेन वर्तमानपरिस्थितिम् अनुलक्ष्य सामाजिकान् जनान् च उद्दिश्य काचित् अन्तर्जालीया अल्पकालीना प्रमाणपत्रीय-योजना आरब्धा वर्तते। "रामायण एवं व्यक्तित्व विकास" तथा "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" विषयौ अधिकृत्य आयोजितायाः अस्याः योजनायाः उद्घाटनं ०३.०८.२०२० दिनाङ्के सायं पञ्चवादने अन्तर्जालमाध्यमेन जातम्। अस्मिन् उद्घाटनसत्रे मुख्यातिथिरूपेण गुजरात टेक्नोलॉजिकल विश्वविद्यालयस्य कुलपतिः प्रो. नवीन शेठः उपस्थितः आसीत्। कार्यक्रमस्य आरम्भे मुख्यसंयोजकेन प्रो. महेन्द्रकुमार दवे वर्येण अन्तर्जालमाध्यमेन उपस्थितानां महानुभावानां स्वागतं विधाय अस्य कार्यक्रमस्य प्रास्ताविकं प्रास्तावि। तदनु मुख्यातिथेः प्रो. नवीन शेठ वर्यस्य उद्बोधनं जातं यत्र महोदयेन विश्वविद्यालयद्वारा आरब्धस्य एतस्य उपक्रमस्य भूरिशः प्रशंसा कृता। अस्मिन् कार्यक्रमे अध्यक्षरूपेण वदता प्रो. गोपबन्धु मिश्र वर्येण उक्तं यत् सम्प्रति संस्कृतविश्वविद्यालयेषु शास्त्राध्ययनेन साकं सामाजिकावश्यकताम् उद्दिश्य अपि कतिपयाः पाठ्यक्रमाः सञ्चाल्यमानाः सन्ति। तस्मिन् प्रसङ्गे अस्माकं विश्वविद्यालयेन "रामायण एवं व्यक्तित्व विकास" तथा "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" इति अन्तर्जालीया अल्पकालीना प्रमाणपत्रीय-योजना आरब्धा वर्तते, यया च नूनं सामाजिकाः जनाः लाभान्विताः भविष्यन्ति। कार्यक्रमस्य अन्ते कुलसचिवः डॉ. दशरथ जादवः धन्यवादज्ञापनम् अकरोत्। अस्य उद्घाटनकार्यक्रमस्य समग्रं सञ्चालनं दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।

"रामायण एवं व्यक्तित्व विकास" इति अन्तर्जालीयायाम् अल्पकालीन-प्रमाणपत्रीय-योजनायां प्रतिसप्ताहं सोमवासरे, मङ्गलवासरे, बुधवासरे च सायं षड्वादनतः सप्तवादनं यावत् रामायणे कृतभूरिपरिश्रमाणां विदुषां विभिन्नविषयेषु उत्तमानि व्याख्यानानि भवन्ति। अस्याः योजनायाः सम्पूर्तिः २१.१०.२०२० दिनाङ्के भविता। "रामायण एवं व्यक्तित्व विकास" इति अन्तर्जालीय-अल्पकालीन-प्रमाणपत्रीय-योजनायाः संयोजनं डॉ. जानकीशरण आचार्यः कुर्वन् अस्ति।

प्रति-गुरु-शुक्र-शनिवासरम् सायम् ६ तः ७ वादनं यावत् "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" इत्यस्याः योजनायाः अङ्गतया कुशलैः अध्यापकैः अध्यापनं क्रियते। प्रतिसप्ताहम् निरन्तरम् एतदन्तर्गतं व्याख्यानानि भवन्ति। अस्यां योजनायां प्रश्नपत्रद्वयम् अस्ति, प्रथमे प्रश्नपत्रे रघुवंशस्य द्वितीयसर्गस्य ०१ तः ३० श्लोकाः तथा द्वितीये प्रश्नपत्रे ३१ तः ७५ श्लोकाः सन्ति। प्रथमप्रश्नपत्रस्य अध्यापनम् अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेल-महोदयः ०१ तः १५ श्लोकपर्यन्तम्, तथा प्राचार्यः डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयः १६ तः ३० श्लोकपर्यन्तम् अकुरुताम्। अध्यापनस्य पद्धतिः अतीव रुचिप्रदा अस्ति। अत्र एकैकं पद्यम् अतीव व्यवस्थितपद्धत्या पाठ्यते। पद्यम्, पद्यस्य पदच्छेदः, आकाङ्क्षा, अन्वयः, तिसृषु भाषासु पदार्थः भावार्थः च, व्याकरणं समासः सन्धिः कृदन्तः तद्धितम्, छन्दः, अलङ्कारः तथा प्रयुक्तस्य क्रियापदस्य धातुरूपाणि, एवं क्रमेण प्रत्येकं पद्यस्य पाठनम् अस्यां योजनायां भवति। द्वयोः सप्ताहयोः एकवारं मार्गदर्शनाय विशिष्टं चर्चासत्रम् अपि आयोज्यते। तत्र अध्येतॄणां जिज्ञासाशमनं, शङ्कासमाधानं किञ्च विविधविषयाणां चर्चा भवति।

रघुवंशम् (द्वितीयसर्गः) कथं पठेम इति योजनायाः संयोजकः साहित्यविभागस्य सहायकाचार्यः श्रीजिगरः भट्टः अस्ति। प्रतिव्याख्यानम् ओडिओ-विडिओ रेकोर्डिंग् संयोजकद्वारा भवति। अद्यावधि जातानि सर्वाणि व्याख्यानानि उपलब्धानि सन्ति। एवम्, विश्वविद्यालयस्य अयं विशिष्टः प्रकल्पः सफलतापूर्वकम् आयोज्यमानः अस्ति।

# संस्कारों का मानव जीवन पर प्रभाव तथा संस्कृतवाक्याभ्यासः इति ओनलाइन अल्पकालीना प्रमाणपत्रीय-योजना




१७.१०.२०२० तमे दिनाङ्के नवरात्रोत्सवस्य प्रथमे दिने सायं ५:०० तः ६:०० वादनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालयेन द्वयोः ऑन-लाईन-अल्पकालिकपाठ्यक्रमयोः उद्घाटनकार्यक्रमः आयोजितः। तौ द्वौ पाठ्यक्रमौ १. संस्कारों का मानव जीवन पर प्रभाव २. संस्कृतवाक्याभ्यासः इति। विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितपटेलमहोदयः सर्वादौ मान्यवराणां स्वागतमकरोत्। कार्यक्रमस्य अस्य मुख्यातिथित्वेन सम्प्राप्तः सौराष्ट्रविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. नितिन पेथाणी महाभागः स्वीये भाषणे संस्कृतभाषायाः, संस्काराणां च महत्त्वं सम्यक् अबोधयत्। संस्कृतभाषा, शास्त्राणि चैव भारतं मानसिकदासतायाः मुक्त्वा विश्वगुरुपदं प्रापयिष्यतः इति विश्वासः तेन प्रकटितः। अस्मै कार्यक्रमाय गुजरातराज्यस्य माननीयः मुख्यमन्त्री श्रीविजय रूपाणी महोदयः अपि शुभसन्देशं प्रेषितवान्। गुजरातराज्यस्य माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंह चूडासमा महोदयः अपि विडिओ-सन्देशं प्रेषितवान्। कार्यक्रमान्ते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः पाठ्यक्रमद्वयेऽपि महाभागवतां प्रोत्साहात्मकानि आशीर्वचनानि अवदत्। कार्यक्रमान्ते विश्वविद्यालयस्य कुलसचिवः कार्यक्रमस्य सफलतार्थं यतितवद्भ्यः सर्वेभ्यः अपि धन्यतां प्राकटयत्। कार्यक्रमस्य सूत्रसञ्चालनं पुराणाचार्यः डॉ. पङ्कज रावल महोदयः अकरोत्।

एतयोः योजनयोः प्रायः १०० प्रतिभागिनः सशुल्कं भागं गृहीतवन्तः। संस्कृतवाक्याभ्यासस्य योजनायाः व्याख्यानानि प्रत्येकं सोम-मङ्गल-बुधवासरेषु तथा संस्कारों का मानव जीवन पर प्रभाव इति योजनायाः व्याख्यानानि प्रत्येकं गुरु-शुक्र-शनिवासरेषु आयोज्यन्ते।

## ज्योतिषविषयकः वेबिनारकार्यक्रमः




श्रीसोमनाथ-संस्कृत-विश्वविद्यालय IQAC, अनुस्नातकविभागः तथा विश्वविद्यालयद्वारा संचालित-संस्कृत-महाविद्यालयः इत्येतेषां संयुक्ततत्वावधाने ३१.०३.२०२१ तमे दिनाङ्के "वास्तुशास्त्रस्यालोके कक्षविन्यासः" इति समाजोपयोगी विषयमुपादाय ज्योतिषविषयक-वेबिनार इति कार्यक्रमः सत्रद्वयेनानुष्ठितः। कार्यक्रमस्य उद्घाटनसत्रे काशी-हिन्दु-विश्वविद्यालयस्य संस्कृत-विद्याधर्म-विज्ञान-सङ्कायस्य पूर्वाध्यक्षः प्रो॰ रामचन्द्रः पाण्डेयवर्यः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय वास्तुशास्त्रदृष्ट्या गृहनिर्माणस्य कृते योग्यव्यवस्थाविषये सदसः मार्गदर्शनमकरोत्। सत्रेऽस्मिन् कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। वैदिकमङ्गलाचरणेन प्रारब्धे उद्घाटनसत्रेऽस्मिन् ज्योतिषविभागस्य सहायकाचार्यः नित्यानन्द ओझा मान्यवराणां स्वागतेन सहितं कार्यक्रमस्य प्रास्ताविकं प्रास्तौत्। प्रथमसत्रेऽस्मिन् डॉ. हेमु महेश राठोड महोदया, पन्नालाल व्यासः, कृष्णकुमार भार्गवः तथा च श्रीधरव्यासः स्वीयशोधपत्राणि पठितवन्तः। सत्रान्ते नित्यानन्द ओझा सर्वेषां महानुभावानां धन्यतां प्राकटयत्। अस्य प्रथमसत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्या अपूर्वा अग्रवाल अकार्षीत्। कार्यक्रमस्यास्य फेसबुकमाध्यमेन प्रत्यक्षप्रसारणमपि अभवत्।

ज्योतिषविषयक-वेबिनार इति कार्यक्रमस्य द्वितीयसत्रस्य आध्यक्ष्यं वेदवेदाङ्गसङ्कायस्य पूर्वाध्यक्षः प्रो. देवेन्द्रनाथ पाण्डेयवर्यः ऊढवान्। सत्रेऽस्मिन् षड्भिः शोधपत्रवाचकैः विविधाः प्रासंगिकविषयाः उपस्थापिताः। सम्पूर्णे वेबिनारे आहत्य दश शोधपत्राणि पठितानि। द्वितीयसत्रस्यान्ते अपूर्वा अग्रवाल-महोदयया सर्वेषां धन्यवादः आचरितः। पूर्णतामन्त्रेण कार्यक्रमस्य समापनं जातम्। सत्रस्यास्य सञ्चालनं नित्यानन्द ओझा अकरोत्। अस्य ज्योतिष-वेबिनार इति कार्यक्रमस्य मुख्यसंयोजकत्वं नित्यानन्द ओझा ऊढवान्, संयोजकत्वञ्च सुश्री अपूर्वा अग्रवाल च ऊढवती।

## स्वच्छताभियानकार्य्यक्रमः

महिलाधिकारसमित्या गणतन्त्रदिनमुपलक्ष्य २५-०१-२०२१ तमे दिनाङ्के सायं सार्धत्रिवादनतः स्वच्छताभियानकार्य्यक्रमः आयोजितः आसीत्। अस्मिन् कार्यक्रमे छात्राः अध्यापकाश्च उपस्थिताः आसन्।



स्वच्छताभियानकार्य्यक्रमस्य किञ्चन दृश्यम्



स्वच्छता कुर्वन्तः विश्वविद्यालयस्य महिलाप्राध्यापिकाः छात्राश्च

## शास्त्रि-शिक्षाशास्त्रि-पाठ्यक्रमस्य मान्यता प्राप्ता

श्रीसोमनाथसंस्कृतविश्वविद्यालये २०२१-२२ इति शैक्षणिकवर्षतः चतुर्वर्षात्मकस्य शास्त्रि-शिक्षाशास्त्रि इति संयुक्ताभ्यासक्रमस्य (B.A. B.ED. Integrated Course) आरम्भः भविष्यति। तदर्थं NCTE द्वारा मान्यता प्रदत्ता अस्ति।



# સોમનાથ સંસ્કૃત યુનિ.માં હવે બી.એ. બી.એડ. થઇ શકશે


## આગામી શૈક્ષણિક વર્ષથી ૧૨ પાસ કરનાર છાત્રોને લાભ

(પ્રતિનિધિ દ્વારા)

વેરાવળ તા.૮

Jayhind 09-01-2021 p.8

२०२१-२२ वर्षतः शिक्षाशास्त्रि अभ्यासक्रमस्य आरम्भः





मातृभाषादिवसमुपलक्ष्य विशिष्टं व्याख्यानम्



मातृभाषादिवसमुपलक्ष्य विशिष्टव्याख्यानस्य लाइव प्रसारणम्

# मातृभाषादिवसमुपलक्ष्य विशिष्टं व्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २१/०२/२०२१ तमे दिनाङ्के रविवासरे प्रातः एकादशवादनतः वेबैक्समाध्यमेन मातृभाषादिवसमुपलक्ष्य विशिष्टव्याख्यानमनुष्ठितम्। अस्य व्याख्यानस्य अध्यक्षः विश्वविद्यालयस्य माननीयः कुलपतिः प्रो.गोपबन्धुः मिश्रः आसीत्। कार्य्यक्रमेऽस्मिन् विशिष्टव्याख्यातृत्वेन गुजरातसाहित्याकादम्याः अध्यक्षचरः पद्मश्रीः डॉ. विष्णुपण्ड्यावर्यः उपस्थितः आसीत्। विशिष्टव्याख्यानस्य शुभारम्भाद् अनन्तरमुपस्थितानां समेपाञ्च परिचयपूर्वकं वचोभिः स्वागतं साहित्यविभागस्य आचार्यः प्रो. महेन्द्रकुमारः दवे अकरोत्। ततः 'मातृभाषा गुजराती और आधारभूत अनुबन्ध संस्कृतभाषा' इति विषयमाश्रित्य भाषाविदः डॉ. विष्णुपण्ड्यावर्य्यस्य वैदुष्यपूर्णं व्याख्यानमभवत्। तदनु विश्वविद्यालयस्य कुलपतिवर्यः प्रो.गोपबन्धुः मिश्रः आध्यक्षीयोद्बोधने मातृभाषायाः स्वरूपं विमृश्य मातृवत्कथं व्यवहरति भाषेति लौकिकदृष्टान्तैः सह प्रतिपाद्य आधारभूता मातृभाषा सर्वैः सदा समादरणीयेति प्रसङ्गानुगुणं मार्गदर्शनमकरोत्। अन्ते चोपस्थितान् सर्वान् प्रति कार्तज्ञ्यज्ञापनम् अनुस्नातकविभागाध्यक्षः (कार्यकारी) डॉ. शत्रुघ्नः पाणिग्राही अकरोत्। पूर्णतामन्त्रेण कार्य्यक्रमस्य समापनमभूत्। अस्मिन् कार्य्यक्रमे विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथः जादवः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, सर्वेऽपि आचार्याः, सहाचार्याः, सहायकाचार्याश्च वेबैक्समाध्यमेन संलग्नाः आसन्। अस्य कार्य्यक्रमस्य प्रसारणं फेसबुकमध्येऽपि जातम्। कार्यक्रमम् एनं व्याकरणविभागस्य सहायिकाचार्या सुश्रीविदुषी बोल्ला समचालयत्।



पदयात्रायां संलग्नाः छात्राः मुंगरामहोदयः च

# स्वतन्त्रतायाः अमृतमहोत्सवः

गुजरातराज्यस्य शिक्षणविभागस्य सूचनानुसारम् १२/०३/२०२१ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन स्वतन्त्रतायाः अमृतमहोत्सवः इति कार्यक्रमः आचरितः। अस्य कार्यक्रमस्य अङ्गतया राष्ट्रिय-सेवा-योजनायाः सहयोगेन पदयात्रायाः आयोजनम् अभवत्। तदनन्तरं छात्राणां कृते निबन्धलेखनस्पर्धायाः आयोजनम् अभवत्। स्पर्धायाम् २५ छात्राः भागम् अगृह्णन्। सम्पूर्णस्य कार्यक्रमस्य संयोजनं डॉ. जयेशकुमारः



निबन्धलेखनस्पर्धा

## महामहोपाध्याय-के.का.शास्त्रि-व्याख्यानमाला




के.का.शास्त्रि-पाक्षिकव्याख्यानमालायाः सप्तमे व्याख्याने मुख्यः वक्ता पद्मश्रीः राजेन्द्रमिश्रवर्यः माननीयः कुलपतिवर्यः च

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य एकादशे दिनाङ्के सायंकाले श्री के. का.शास्त्रि-पाक्षिक-व्याख्यानमालायाः सप्तमं व्याख्यानम् आयोजितम्। अस्मिन् व्याख्याने मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः "पद्मश्रीः"प्रो. राजेन्द्रमिश्रः "अभिराजः"। एषः मान्यवरः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य कुलपतिचरः वर्तते। अस्य कार्यक्रमस्य अध्यक्षः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः आसीत्।

कार्यक्रमस्य आरम्भे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः महानुभावानां परिचयपूर्वकं शाब्दिकं स्वागतम् अकरोत्। ततः श्रीके. का. शास्त्रि-पाक्षिक-व्याख्यानमालायाः सप्तमस्य व्याख्यानस्य मुख्यवक्ता प्रो. राजेन्द्रमिश्रः "भारतीय संस्कृति की वैश्विकता" इति विषयमादाय विद्वत्तापूर्णं व्याख्यानम् अकरोत्। मुख्यवक्तुः व्याख्यानानन्तरम् अध्यक्षः प्रो.गोपबन्धुमिश्रमहोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। कार्यक्रमस्य अन्ते प्रो. देवेन्द्रनाथ-पाण्डेयः कार्यक्रमे उपस्थितानां महानुभावानां धन्यवादज्ञापनम् अकरोत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः, महाविद्यालयस्य प्राचार्यः, सर्वेऽपि अध्यापकाः छात्राः च वेबेक्स माध्यमेन उपस्थिताः आसन्। फेसबुक लाइवमाध्यमेन अनेके श्रोतारः अनेन व्याख्यानेन लाभान्विताः अभवन्। अस्य व्याख्यानसत्रस्य सञ्चालनं वेदवेदाङ्गसङ्कायस्य अध्यक्षः डॉ. शत्रुघ्नः पाणिग्राही अकरोत्।



अष्टमे व्याख्याने मुख्यः वक्ता प्रो. भागीरथी नन्दः

मार्चमासस्य २४ तमे दिनाङ्के अस्याः व्याख्यानमालायाः अष्टमं व्याख्यानम् आयोजितम्। अस्मिन् व्याख्यानसत्रे आदौ डॉ. जानकीशरणः आचार्यः महानुभावानां परिचयपूर्वकं स्वागतम् अकरोत्। ततश्च मुख्यवक्ता लालबहादुरशास्त्रि-केन्द्रिय-संस्कृत-विश्वविद्यालयस्य प्राध्यापकः प्रो. भागीरथी नन्दः "कालिदास साहित्य में अखण्ड भारत की परिकल्पना" इति विषयमादाय रसप्रदं व्याख्यानम् अकरोत्। अस्मिन् अष्टमे व्याख्यानसत्रे माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। अष्टमस्य व्याख्यानसत्रस्य सञ्चालनं डॉ. पङ्कजकुमारः रावलः अकरोत्। एतस्मिन् व्याख्याने अपि सर्वेऽपि अध्यापकाः छात्राः च उपस्थिताः आसन्। इदञ्च व्याख्यानं फेसबुक माध्यमेन प्रसारितम्।

## स्वामिविवेकानन्दजयन्तीमुपलक्ष्य आयोजितं विशिष्टव्याख्यानम्




व्याख्याने भाषमाणः कृतार्थानन्दस्वामिवर्यः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जनवरीमासस्य द्वादशे दिनाङ्के सायङ्काले चतुर्वादनतः वेबैक्समाध्यमेन स्वामिविवेकानन्दजयन्तीमुपलक्ष्य विशिष्टव्याख्यानमायोजितम्। अस्य कार्य्यक्रमस्य आध्यक्ष्यं समलङ्कृतवान् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः। कार्य्यक्रमेऽस्मिन् विशिष्टव्याख्याता आसीत् परमपूज्यः कृतार्थानन्दस्वामिमहोदयः, रामकृष्णमिशन, कलकत्ता। कार्य्यक्रमस्य शुभारम्भः श्रीभाविनपण्ड्यामहोदयेन मङ्गलाचरणेन कृतः। अनन्तरमुपस्थितानां विशिष्टानाञ्च परिचयपूर्वकं स्वागतं वचसा अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलवर्यः अकरोत्। ततः स्वामिविवेकानन्दजयन्तीमुपलक्ष्य आयोजितायाः निबन्धस्पर्धायाः पुरस्कारघोषणा साहित्यविभागस्य प्रो.अर्चनाकुमारीदुबेवर्यया कृता। पुरस्कारस्योद्घोषणायाः अनन्तरं परमपूज्यस्य कृतार्थानन्दस्वामिनः वैदुष्यपूर्णं व्याख्यानं जातम्। ततः विश्वविद्यालयस्य माननीयेन कुलपतिवर्येण प्रो. गोपबन्धुमिश्रमहोदयेन आध्यक्षीयोद्बोधनं विहितम्। अन्ते चोपस्थितानां सर्वेषां कार्तज्ञ्यं प्रो. अर्चनाकुमारीदुबेवर्य्या प्रकटितवती। पूर्णतामन्त्रेण कार्य्यक्रमस्य समापनमभूत्। अस्य कार्य्यक्रमस्य सञ्चालनं विद्यावारिधिच्छात्रेण श्रीदिलीपत्रिवेदिमहोदयेन अकारि। अस्मिन् कार्य्यक्रमे विश्वविद्यालयस्य सर्वे अपि आचार्याः, सहाचार्याः, सहायकाचार्याः छात्राश्चोपस्थिताः आसन्। अस्य लाईवप्रसारणमपि फेसबुकद्वारा जातम्।


# 'कोविड-१९' सन्दर्भे परीक्षामार्गदर्शनं तथा च कोरोनारोगमुक्तिविषये जागृतिः' इति कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एन.एस.एस.विभागेन 'कोविड-१९'सन्दर्भे परीक्षामार्गदर्शनं तथा च कोरोनारोगमुक्तिविषये जागृतिः' इति कार्यक्रमस्य आयोजनम् १०/५/२०२१ तमे दिनाङ्के कृतमासीत्। यस्मिन् मुख्यप्रवक्तृरूपेण डॉ. कमलेशः उपाध्यायमहोदयः (प्राध्यापकः एवं डीन औषधविभागः, बी.जे.वैद्यकीयमहाविद्यालयः एवं च सिविल होस्पिटल-कर्णाव) एषः महोदयः वर्तमानपरिस्थितौ कोरोनासमये रोगनिवारणनियमपालनेन एवं जागृत्या एव कोरोनां जेतुं शक्नुमः तदुद्बोधितवान्। कोरोना समये किं किं ध्यातव्यं, केषु विषयेषु बोधः भवेत्, कीदृशी जागृतिरनिवार्या तत्सर्वं कार्यक्रमे सर्वेभ्यः सरलशैल्या ज्ञानं दत्तवान् एवं सर्वेषां प्रश्नानाम् उत्तमतया समाधानम् अददत्। कार्यक्रमस्य अध्यक्षरूपेण माननीयः प्रो. गोपबन्धुमिश्रमहोदयः आसीत्। रोगाक्रान्ते काले विद्यार्थिभ्यः परीक्षाविषये मार्गदर्शनस्यावश्यकता आसीत् तस्मिन् विषये सुचारुतया समाधानं दत्तम्। कुलसचिवः दशरथजादवेनापि प्रसङ्गोचितम् उद्बोधनं कृतम्। स्वागतं परिचयविधिं च अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलमहोदयः कृतवान्। कार्यक्रमस्यान्ते आचार्यश्री डॉ. नरेन्द्रकुमारपण्ड्यामहोदयेन आभारविधिः कृतः। कार्यक्रमस्य सञ्चालनं डॉ. श्रीपङ्कजकुमार रावलमहोदयेन कृतम्।कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य विद्यापरिषत्सभ्याः, सङ्कुलस्य अध्यापकाः, विश्वविद्यालयस्य महाविद्यालयानां प्राचार्याः, प्राध्यापकाः, विद्यार्थिनः, प्राच्यछात्राः, एवञ्चाहत्य २०००(द्विसहस्र) जनाः वेबेक्स एवं फेसबुकमाध्यमेन सम्मिलिताः जाताः आसन्। कार्यक्रमस्य संयोजकरूपेण एन. एस. एस. प्रोग्राम को.ओर्डिनेटर डॉ. जे.डी.मुंगरामहोदयः एवं च एन.एस.एस. प्रोग्राम ओफिसर डॉ. पंकजकुमार रावलमहोदयः कार्यं कृतवान्।
















શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી એન.એસ.એસ. વિભાગ દ્વારા ×કોવિડ-૧૯ ના સંદર્ભમાં પરીક્ષા માર્ગદર્શન અને કોરોના રસીકરણ (વેક્સિનેશન) અંગે જાગૃતતા કાર્યક્રમ





સોમનાથ સંસ્કૃત યુનિ.માં કોવિડ
રસીકરણનો માર્ગદર્શન કેમ્પ સંપન્ન

